योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०५४

चतुःपञ्चाशः सर्गः ५४

श्रीवसिष्ठ उवाच ।

जगन्नाम नभः स्वच्छं सद्ब्रह्म नभसि स्थितम् ।

नभो नभसि भातीदं जगच्छब्दार्थ इत्यजम् ।।

त्वमहं जगदित्यादि शब्दार्थो ब्रह्म ब्रह्मणि ।

शान्तं समसमाभासं स्थितमस्थितमेव सत् ।। २

समुद्रगिरिमेघोर्वीविस्फोटमयमप्यजम् ।

काष्ठमौनवदेवेदं जगद्ब्रह्मावतिष्ठते ।। ३

द्रष्टा द्रष्टैव दृश्यस्य स्वभावात्स्वात्मनि स्थितः ।

कर्ता कर्तैव कर्तव्याभावतः कारणादृते ।। ४

न ज्ञत्वं न च कर्तृत्वं न जडत्वं न भोक्तृता ।

न शून्यता न चार्थत्वमिह नापि नभोर्थता ।। ५

शिलाजठरवत्सत्यं घनमेकमजं ततम् ।

सर्वं शान्तमनाद्यन्तमेक विधिनिषेधयोः ।। ६

मरणं जीवितं सत्यमसत्यं च शुभाशुभम् ।

सर्वमेकमजं व्योम वीचिजालजलं यथा ।। ७

विभाग एव दृश्यत्वं द्रष्ट्रत्वं चैव गच्छति ।

एतच्च कल्पनं स्वप्नपुरादिष्वनुभूयते ।। ८

एवमच्छं पराकाशे स्वप्नपत्तनवज्जगत् ।

भाति प्रथममेवेदं ब्रह्मैवेत्थमतः स्थितम् ।। ९

तदिदं तादृशं विद्धि सर्वम् सर्वात्मकं च यत् ।

देशाद्देशान्तरप्राप्तौ विदो मध्यमनङ्कितम् ।। १०

चिद्व्योम्नः शान्तशान्तस्य मध्यमे चैवमास्थितम् ।
जगत्तथैव सलिलमेवोर्म्यादितया यथा ।। ११
यदुदेत्युदितं यच्च यच्च नोदेति नोदितम् ।
देशाद्देशान्तरप्राप्तौ विदो मध्यान्न भेदितम् ।। १२
अतः किलास्य सर्गस्य कारणं शशशृङ्गवत् ।
प्रयत्नेनापि चान्विष्टं न किंचिदुपलभ्यते ।। १३
यदकारणकं भाति तदभातं भ्रमात्मकम् ।
भ्रमस्यासत्यरूपस्य सत्यता कथमुच्यते ।। १४
कारणेन विना कार्यं किल किं नाम विद्यते ।
यदपुत्रस्य सत्पुत्रदर्शनं स भ्रमो न सत् ।। १५
यस्त्वकारणको भाति स स्वभावो विजृम्भते ।
सर्वरूपेण संकल्पगन्धर्वनगरादिवत् ।। १६
देशाद्देशान्तरप्राप्तौ क्षणान्मध्यं विदो वपुः ।
स्वरूपमजहत्त्वेव राजतेऽर्थविवर्तवत् ।। १७
बोध एव कचत्यर्थरूपेण स च स्वादणुः ।
दृष्टान्तोऽत्रानुभूतोऽन्तः स्वप्नसंकल्पपर्वतः ।। १८
श्रीराम उवाच ।
विद्यते वटबीजान्तर्यथा भाविमहाद्रुमः ।
परमाणौ तथा सर्गो ब्रह्मन्कस्मान्न विद्यते ।। १९
श्रीवसिष्ठ उवाच ।
यत्रास्ति बीजं तत्र स्याच्छाखा विततरूपिणी ।
जन्यते कारणैः सा च वितता सहकारिभिः ।। २०
समस्तभूतप्रलये बीजमाकारि किं भवेत् ।
सहकार्यथ किं तस्य जायते यद्वशाज्जगत् ।। २१
यत्तु ब्रह्म परं शान्तं का तत्राकारकल्पना ।
परमाणुत्वयोगोऽपि नात्र केवात्र बीजता ।। २२

कारणस्येति बीजस्य सत्यासत्यैककारिणः ।

असंभवाज्जगत्सत्ता कथं केन कुतः क्व का ।। २३

जगदास्ते परस्याणोरन्तरित्यपि नोचितम् ।

सार्षपे कणके मेरुरास्त इत्यज्ञकल्पना ।। २४

सति बीजे प्रवर्तन्ते कार्यकारणदृष्टयः ।

निराकारस्य किं बीजं क्व जन्यजनकक्रमः ।। २५

अतो यत्परमं तत्त्वं तदेवेदं जगत्स्थितम् ।

नेह प्रथयते किंचिन्न च किंचिद्विनश्यति ।। २६

चिदाकाशश्चिदाकाशे हृदि चित्त्वाज्जगद्भ्रमम् ।

अशुद्धवदिवाशुद्धे शुद्धं शुद्धे प्रपश्यति ।। २७

स्वमेवाभासते तस्य रूपं स्पन्द इवानिले ।

सर्गशब्दार्थकलना नेह काश्चन सन्ति नः ।। २८

यथा शून्यत्वमाकाशे द्रवत्वं च यथा जले ।

अन्यतात्ममयी शुद्धा सर्गतेय तथात्मनि ।। २९

भारूपमिदमाशान्तं जगद्ब्रह्मैव नस्ततम् ।

अनादिनिधनं सत्यं नोदेति न च शाम्यति ।। ३०

देशाद्देशान्तरप्राप्तौ क्षणान्मध्ये विदो वपुः ।

यत्तज्जगदितीवेदं व्योमात्मनि व्यवस्थितम् ।। ३१

यथा स्पन्दोऽनिले तोये द्रवत्वं व्योम्नि शून्यता ।

तथा जगदिदं भातमनन्याश्लेषमात्मनि ।। ३२

संविन्नभो ननु जगन्नभ इत्यनर्क-

मात्मन्यवस्थितमनस्तमयोदयं क्व ।

तत्त्वङ्गभूतमखिलं तदनन्यदेव

दृश्यं निरस्तकलनोऽम्बरमात्रमास्व ।। ३३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे उत्तरार्धे अद्वैतैक्यप्रतिपादनं नाम चतुःपञ्चाशः

सर्गः ।। ५४ ।।